स्यआयुष्यपासनमरण्यं हत्वा वितानंसाधयित्वारौद्रपशुमालभेतसांडगो वशिद्धात्॥ ॥ ॥

शाब्दस्यचा सकात्एवंभूतोवायुश्चतियर्ज्यम्। नसध्धत्वेतिदासविशेषणमुपक्रांतत्वात्। शेषंसमानम्॥ शूलगवइति
कर्मनाम धेयम्। स्वर्ग्यइतिस्वर्गादिकामैः पर्यायेणसंब ध्यते। नहियुगवत्सर्वककामो सतिसंभवः। वक्ष्यते। इतिसूत्र
शेषः। ॐ पायनं अवसथ्याग्निं अरण्यंनीत्वा। तत्र वितानंसाधयित्वा अवसथ्याग्नेराहवनीयदक्षिणाग्नेरुद्धरणंकृत्वा।
रुद्रदेवत्यपशुसांडमनपुंसकं आलभेत॥ तस्यवाचया भागंस्यप्राप्तोगौर्वा। वाशब्दएवार्थे। गौरेवासौन छागः कुतः
शब्दात्शूलगवइतिवचनात्॥ ॥

॥ द्वि॰ ॥
॥ नयराम ॥

वपांश्रपयित्वेतिविहितश्रपणेप्राप्तेसहश्रपणार्थोयमादेशः विहितश्रवणांकथमितिचेत्। वोदकपरिश्रान्त्याज्यासादनो
त्तरकालमन्येषांपशूनांशाखानिरवननंप्राप्तम्। उत्तराघारांतेचपशुसमंजनादीनांविहितत्वात्। मित्राग्नावदानानांनाग्
चपपक्षाहवनीयएवश्रपणंप्राप्तम्। अतोत्रवचनात्सहश्रपणमुच्यते। रुद्रायेत्यादेर्जुहोतीतिशेषः। अवदानानि
मिश्राण्यग्न्यादीशानांतेभ्योजुहोत्यभिरेवनामंत्रैः ततोवनस्पतिहोमः पृषदाज्येनातेनेवदृष्टत्वात्। ततोवनस्पति

चेमां श्रपयित्वास्थालीपाकमवदानानिचरुद्राय वपामंतरिक्षाय वास्तीं स्थालीपाकं आण्यवदानानिजुहोत्य
ग्नयेरुद्रायशर्वायपशूपतयेउग्रायशानायभवायमहादेवायेशानायेतिवनस्पतिमितिलोहितंस्विष्टकृद
दिग्व्याघारणं व्याघारणांतेपत्नीः संयाजयंताग्नयेश्रवणेभवान्याअग्निगृहपतिमितिलोहितपालाश
पुकुशेषुरुद्रसेनाभ्यावलिंहरतियास्तेरुद्रपुरस्तात्सेनास्ताभ्यएषवलिस्ताभ्यस्तेनमोयास्तेरुद्रदक्षिण
तः सेनास्ताभ्यएषवलिस्ताभ्यस्तेनमोयास्तेरुद्रदक्षिणतः सेनास्ताभ्यएषवलिस्ताभ्यस्तेनमोयास्तेरुद्रपश्चा
त्सेनास्ताभ्यएषवलिस्ताभ्यस्तेनमोयास्तेरुद्रोत्तरतः सेनास्ताभ्यएषवलिस्ताभ्यस्तेनमोयास्तेरुद्रोपरिष्टात्सेना
स्ताभ्यएषवलिस्ताभ्यस्तेनमोयास्तेरुद्राधस्तात्सेनास्ताभ्याएषवलिस्ताभ्यस्तेनमइति॥ ॥

होमः पृषदाज्येनाततः स्विष्टकृतंकृत्वादिशांव्याघारणंकर्त्तव्यमितिसूत्रशेषः। तच्चवसयाभवतियथाग्निषोमीये। पत्नीसंयाजा
अप्येतेनामभिर्मंत्रैरपराभौ। तत्रदृष्टत्वात्॥ ततप्राशनांतेपशूनानुव्यवमत्कांगांदत्त्वालोहितंशोरक्तं शेषुपलाशपत्रेषु। कुशेषु
वासनेषुवलित्वेनददाति। यास्तेरुद्रेत्यादिर्विशेषडिर्मंत्रैः प्रतिमंत्रम् तदर्थः सुगमः। तेतुभ्यंवेतियोज्यं। अत्रपणांपरमेष्ठीयजु
रुद्रोह ॥ ॥ ॥

॥ द्वि॰ ॥
॥ भा॰ ६७ ॥

उचद्यपुरीषाधानयोभसिद्धमाहवनीयेप्रक्षिपति अनुवातंवातालिमुखंपशुअवशिष्टपशुन्। रीरवेएंरुद्रैः रुद्राध्यायात्मातमंत्रैः स्तौति।
प्रथमोत्तमोअाद्यतौताभ्यांवा। पशोरत्रमास्मितिशेषः॥ ॥ एतेनैवविधानेनगोयज्ञाकर्मविशेषः॥ असौवपायसेनचरुणा अ
नर्थलुप्तश्च भवति। पायसेनचरुणाअनर्थलुप्तश्चभवति। पायसेनश्रूलगवदेवतामात्रेज्येत्यर्थः। तस्यश्रूलगवपशोर्वयस्मानु
ल्यवयागोर्दक्षिणादेया॥ ८॥ अथचषोत्सर्गः कर्मविशेषः। व तरति सूत्रशेषः। व्याख्यातइतिपायसेनश्रूलगवदेवताहोम

अवहयंलोहितलिप्तमसोप्रास्यन्यघोवानिष्पननंन्यनुवातंपश्ञ्चमकस्थाप्परुद्रैरुपतिष्ठतेप्रप्यमेतिमाभ्यांवानुवाक
भ्यांतैलस्यपत्रोर्गमंहरंसेतेनैवगोयज्ञोव्याख्यातः पायसेनोनर्थलुप्तस्यलुज्यवयागोर्दक्षिणा॥ ८॥ अथवृषो
त्सर्गोगोयज्ञेनव्याख्यातः कार्त्तिक्यांपौर्णमास्ये। रेवत्यांवाश्वयुजस्यमध्येगधांसुसमिद्धमग्निंकृत्वाज्यं
संस्कृत्ये तिरितिष होतिपूषगाअन्वेतुनः पूषार त्ववर्वतः। पूषावाजंसनोतुनइतिपौष्णस्यजुहोति॥ ॥

कः कोप्पितः सषकार्त्तिक्याआश्वयुज्यांवापौर्णमास्यामेवभवति। रेवत्यामितितद्विशेषणंफलतिरायार्य्यम्। आज्यंसंस्कृत्ये
तिग्रहणमाघाराद्दोमादपिभागाज्याहुतयः स्युरिति। ततआघारावाज्यभागौहुत्वापायसेनश्रूलगवदेवताहोमः। ततः पूषागा
इत्येषाकाहुतिः पिष्टचरोः संख्यानुपदेशात्। सवस्त्रपणानुपदेशात्सिद्धएवासायते। अथमंत्रार्थः। तत्रपरमेष्ठीगायत्रापू
षापिष्टहोमे। पूषास्मस्मिनोस्माकंगाः धेनूरिंद्रियाणिअन्वेतुअनुगच्छतु। अर्वतः अश्वान्प्राणान्वारक्षतु। वाजुमन्नंसनो
तुददातु। पूषशब्दार्थवतिपदार्थः॥ ॥

॥ ६६ ॥
॥ नयेराम ॥

ततः पायसस्वपोत्स्या स्विष्टकृत्तेऽहुत्वा प्राशनांते। रुद्रान्रुद्रमंत्रा अपित्वायोवा महत्वेन सूपाच्छादकः। तेनैव वाल सुखेन च्छ
द्यते। रोहितः लोहितएव स्यादि॥ पप्यो क्तो वेतिविकल्पः। लवगिरूपतइत्यन्युतूनाधिकोगइत्यर्थः॥ जीववत्सायाः पुत्रइत्यादि
गुणोयः स्यात् तमलंकृत्य सत्रगी दिभिः पूर्थे प्रधानाश्चतुरस्त्रोच सतरा श्वालंकृत्यो वत्सृजेत् एतमितिमंत्रेण। तस्यार्थः। तत्र प्र
जापतिस्त्रिष्टुप्गावउपावत्सर्गे। वत्सं तर्पः एतस्वाषी। युवानं तरूणं। पतित्तित्तार वोयुष्मभ्यंददा। मितेनानेन प्रियेण सहक्री
डताः। क्रीडंत्सायूयंचरप्यचरती स्वच्छंदं विहरतेतियावत्। तृणानिन रवादतेति। वानास्मा कंस्छानेसा तजन्मसबद्धपसा।

रुद्राज्जपित्वेकवर्षं। द्विवर्णंवायोवानूपंच्छादतित्वंवानूपंच्छादयेद्रोहितोवे वत्स्या वागेरूपेतोजीववत्स्या
याः पयस्विन्याः पूत्रोपृथेवरूपपयस्वितमः स्यात्तमलंहृपूर्व्वेमुरव्याश्वतस्रोचवत्सतपस्ता श्वालंकृत्येतंपुचान्तं
तिवोददामितेनक्री डंतोश्चरथप्रियेणमानः समजनुषासुभगारायस्पोषेणसत्तनिषामदेभेसेत वानंपतिचोद
येवोत्सृजरन्न प्यस्ताम भिमंत्रयंते। मयोभूरित्यनुवाकशेषेणास्त वीसां पयसिपायसा श्रपयित्वाब्राह्मणान्भो
जयसश्रुमप्यककुर्वतितस्य शूलगपेन कल्पोव्याख्यातः॥ ॥८॥ ॥

सहसुभगा भवतेतिशेषः। वयमपियुष्मत्प्रसादाद्धायस्पोपेणधनादिपुष्ट्या सम्यग नवेनरषा अन्तेनवमदेस्याम॥ ॥एतयात्स
वावत्सवत्सरीश्चोत्सृजेरन्। न न्यस्तंच वत्सतसामद्ध्यस्छम्। इदंकमतिरं। भवसिामितियावन्यः त्वीयागावस्छानतानीन्।
केपशु। पायसपाशानंचकुर्वति। तस्यकल्पोव्याख्यातः शूलगचवत्सर्वकर्तव्यमित्यर्थः॥ ॥८॥ ॥

॥ ६६ ॥
॥ शौद्ध ॥

अथोदककर्म। वक्ष्यतइतिसूत्रशेषः। उककर्मग्रहणंचाशौचादियमनियमोपलक्षणार्थं। अद्विवर्षेऊनद्विवर्षेप्रेतेमृत्तमाता पित्रो
रेकरात्रं त्रिरात्रंवेत्येतं गह्लाकारमतम्। स्मृत्यंतरेनुसर्वसपिंडविषयत्वेन निहितमनद्विवार्षिकेप्रेतेनि द्युवेधिवावहिः
अलंप्यल्पश्रुवोभूमावस्थिसंचयभादते। नास्यकार्योग्निसंस्कारोनापिकार्योदकक्रिया। अरण्येकाष्टवत्त्यक्तो येयु ह
मेवत्विति। अस्थिसंचयनाभावोनुधादएवानोहेरवननेतन्स वः अपिचसंचयनंचेत्ता। निकस्येवविहितामानत्वन्यस्य
उपदेशातिदशायोर वात्। एकरात्रादिविधानमपिअकृतकृतचूलत्वेन वस्छापनीयम्। तृणमकृतचूलानामशु

अथोदककर्मद्विवर्षेप्रेक्षमाता पित्रोराशौचं पूर्शौचमेवेतरेषा
मेकरात्रंत्रिरात्रंवाशरीरारमदग्धानिरवनंति॥ ॥

द्धिनेत्रिकामेस्मृता॥ निवृत्तचूलकानांतु त्रिरात्रशुद्धिरिष्यतइति वचनात्। तथादंतजननमप्यवधित्वेनाभिहितम्। दंतजातेनु
जातेव तचूडेचसंस्थिते। अमुद्रावांधवाः सर्वेसूतकेचतथोच्यतइतिवचनात्। एवंचसतिप्रागतजातेन्नेशितसशुद्धिः
ऊर्ध्वंतु त्रिरात्रमेपि। अन्यदप्पिसद्यःशौचम। तम् चाजेप्रेतेचसत्यसत्ते द्यः शौचंविधियतइति। एतत्र ।मकरणादूर्ध्व
तम्। अ चोनामकरणात्प्राकूस॥ ॥ ॥ ॥

॥ द्वि० ॥
॥ प्रथम ॥

यः शौचम्। ततऊर्द्ध्वं दंतजनानात्प्राकृनैवशौचशुद्धिः। ततऊर्द्ध्वं प्रागुपनायनात् त्रिरात्रम्। अत्र कृत चूडास्य प्रागुपनयनात्त्रि
रात्रमेवा तर्हि किमर्थं द्विस्त्रिरात्रग्रहणं कृत चूडस्या द्विवार्षिकस्य वेतितत्राह। यदूनद्विवार्षिकस्य त्रिरात्रग्रहणं तदग्निदा
होदकदानयोर्विकल्पेन। ऊर्द्ध्वं तु नियमेनेति। उक्तएतत्। यनैव वक्ष्यति द्विवर्षप्रभृतिप्रेतमाश्मशानात्सर्वेनुगच्छेयुरिति॥
एतच्च पुरुषविषयम्। विषयस्यान्यवचनांतरस्यसंज्ञावात्॥ तदाह। स्त्रीणामसंस्कृतानांतु त्र्यहाच्छुद्ध्यंति बांधवाः यथो
क्तेनैव कल्पेन शुद्ध्यंति तु सनाभय इति। संस्कारश्चैवच वाग्दानम्। अतथाप्रापोढायां तु कन्यायां सद्यः शौचं विधीयत
इति। अप्रोढा चात्राकृतचूडोच्यते। तथा। आह स्वः कन्या स्त्विति। एतदुक्तं भवति। अकृत चूडामुत्रापुसद्यः शौचम्॥ क
रणादूर्द्ध्वं वाग्दान गेकाहः ततउपविवाहात्प्राक्त्रिरात्रमितिएतच्च चयोचरस्त्र। विशेषनसर्वविपसिधारणमव
सयम्। नचात्रवर्णविशेषा वसानुशक्यतइति॥ कुतद्विवार्षिकस्यशारारमदग्ध्वा निरवनती गच्छ कारमतम्। म
नुमानु विकल्पेनदाहोत्तिहितः। तेनात्तापि विकल्पे। चसेयइति। अत्र। शौचशब्देनेच वर्णाश्रम विहित कर्म्मानुष्ठान
संकोचावस्थोच्यते। तत्रापि विशेषो वक्त स्वाध्याया पेक्षवत्तिसंकोचनिमित्तो व्याख्याते॥

॥ द्वि० ॥
॥ प्रोढ ॥

अतः सूतकमध्येचेत्सूतकांतरमापद्यतेतदाउत्थानात्। आपूर्वेत्थानपर्यंतं अशुद्धिः पूर्वस्यैव सूतकाशौचस्योत्पानेनो
त्तरस्यापि शुद्धिरित्यर्थः। अन्योशौचं शाचं मृतकदृष्टव्यम्। पूर्वशावशुद्धोत्तरशावस्यापि शुद्धिरित्यर्थः। तथाहगोतमः। तच्चे
दंतः पुनरापतेत्तत्तच्छेषेण शुद्ध्येरन्निति। तच्छब्देनात्रसमानजातीयं गृह्यते सूतकोपानिपातातु विजातीयेपि तच्छे
षादानसामर्थ्यात्। शंखश्च। अथचेदरवश्चेअप्यन्येदंतदाम्रियेतजायते वा। शिष्टैश्चादिनैः शुद्धोताहः शेषेस तिष्ठा
प्रभातेतिष्ठंति रिति। अपरेत्वन्यथ्यावर्णयंति। मरणस्योपक्रांतत्वात् अंतः सूतके चेद्बालस्य मरणमापद्येततदा आस्

अतः सूतके चेदाशौचनादशौचं सूतकवन्नात्रोदककर्म द्विवर्षप्रभृतिप्रेतमाश्मशानात्सर्वेनुगच्छेयुर्य
ममाथांगायंतोयमसूक्तं चजपंतइत्येकेपद्युपेतो भूमिजोषणादि समानमा हिताग्नेरोदकांतस्यगमनात्॥ ॥

तकस्योरपानादाशौचसूतकवद्भवति। मा भूद्बालत्वात्सद्यः शौचमिति। अत्र भनद्विवर्षे। उदककर्म उदकदानं प्रतिषेधादाहो
पिनिरस्तः सन्नियोगित्वात्। सन्नियोगोत्वनयोः स्मृत्यंतरेभिहितः। नास्यकार्योग्निसंस्कारो नापिकार्योदकक्रियेतिसर्वे
इति सर्वशब्दैः सपिंडवयषयः तन ते सर्वेनुगच्छेयुः श्मशानग्रहणाद्दाहमपिकुर्युः। यमगाथाच्छंदो विशेषम्। यमसूक्तं
तु मसिद्धमेव। यदि उपेतः उपनीतः प्रेतः स्यात्तदा भूमिजोषणादि आ उदकांतस्यगमनात्सर्वमाहिताग्निविधानेनतुल्यं कार्यं॥ ॥

शालाग्निना। आवसथ्येन एनं प्रेतं दहंति। यद्यसौ प्रेत आहितः कृतावसथ्याधानः। इतरस्य कृतावसथ्यं ग्रामाग्निना लौकिकेनाग्नि
नातूष्णीं मंत्रं विनैव दहंति। संयुक्ताः संबंधादिना मिथुनस्य कुदेशालसपायामिथुनशब्दवाच्यायाः पन्न्या भ्राताश्यालकश्वसुरः
तं वा उदकं उदकदानार्थं याचेयुः। उदकं करिष्यामहे इति मंत्रेण। प्रवृत्तिप्रतिवचनं च कुरुध्वं मा च एवं पुनरिति॥ इतरः शतवर्ष
प्रवृत्तिके तस्मिन्प्रेते कुरुध्वमित्यव प्रतिवचनाम्॥ सातयः सापिंडा आसप्तमात्पूरुषात् समानोदकाश्चा दशमात्तेस

शालाग्निना हन्त्येनमाहितश्चेत्तूष्णीं ग्रामाग्निनेतरं संयुक्तं मैथुनं चोदकं याचेरन्नुदकं करिष्यामह इति कुरु
ध्वं मा चैवं पुनरतातशतवर्षे प्रेते कुरुध्वमित्येव तस्मिन्सर्वे ज्ञातयो यान्यच्च यंत्यासप्तमात्पूरुषाद्दशमाद्वा समा
नग्रामवसे यावत्संबंधमनुस्मरेयुरेकवस्त्राः प्राचीनावीतिनः सव्यस्यानामिकया पापनोद्यापनः शोशुचद
घमिति दक्षिणामुखा निमज्जंति प्रेतायोदकं सकृत्प्रसिंचंत्यंजलिना सावेतत्तउदकमित्युत्तीर्णाद्भिश्चो
देशाद्वले चत्युपविष्टांस्तत्रैतानपचदेयुः॥ ॥

यैएव अपोनवपंतिजलं प्रविशंति। समानग्रामे एकत्र वासे यावत्संबंधः स्मर्यते अमुष्मिन्वयं संबद्ध्यमह इति तावंतो यो
न्यवेयुः। अपयैनः शाशुचदघमित्यघापनोदनमंत्रः। असावेतत्त इति मंत्रेण जलांजलिदानम्। असौस्थाने प्रेतनामादे
शः। उदकादुत्तीर्णास्ततः शाद्वले हरिततृणं तद्वाति प्रदेशे उपविष्टानपरे लोकपात्रिका अपचदेयुः प्रेतगुणामुख्या प
नेन तच्छोकमपाकुर्युः॥ ॥ ॥ ॥

॥ ६८ ॥
पभाष्यं ॥

अनपेक्षमाणा। प्रश्यादनवलोचयंतः रीतीभूताः पंक्तिव्यवस्थाः कनिष्ठमग्रतः कृत्वा ग्रामागच्छंति। निवेशनं गृहं तस्य
द्वारि पिचुमंदस्य पत्राणि विदश्य दंतैः खंडयित्वा॥ वम्योदकादीन्यानभ्याश्मानमाक्रम्य गृहं प्रविशंति। त्रिरात्रं ब्रह्मचा
रिणो भवति। अध आस्तृतभूणापिन श्यानवर्किंचित्कर्मस्वयं कुर्वंतिन वान्यं कुर्वंति कारयंति सर्वथः। दिवा गृहपात्रिरात्रं प्रति
पिधार्थं भूपिंडदानं वा वनेजनदानं प्रत्यवनेजने नाम ग्रहणं नामगृह्णात्वेत्यर्थः। भोजनं च पिंडदानसमनंतरम्। मन्यपमात्रे
तामेकां रात्रिं शारोदके व्रहिते निधाय तत्पात्रं आकाशे स्थापयेयुः प्रेतात्र स्नाहीत्येतावता मंत्रेण त्रिरात्रमित्यादावेकरात्रमपि

अनपेक्षमाणा ग्राममायांति रीतीभूताः कनिष्ठपूर्वा निवेशनद्वारे पिचुमंदपत्राणि विदश्याचम्योदकमग्निं गोमयं गौर
सर्षपांस्तैलमालभ्याश्मानमाक्रम्य प्रविशंति। त्रिरात्रं ब्रह्मचारिणोऽधःशायिनो न किंचन कर्म कुर्युर्न प्रकुर्वीर
न्क्रीत्वा लब्ध्वा वा दिवैवान्नमश्नीयुरमांसं प्रेताय पिंडं दत्वावनेजनदानप्रत्यवनेजनेषु नाम गृहीत्वा मन्मयपात्रे
क्षीरोदके विहायसि निदध्युः प्रेतात्र स्नाहीति त्रिरात्रं शावमाशौचं दशरात्रमित्येके॥ ॥

त्यसेके। दशाहं शावमाशौचं सपिंडेषु विधाय नोअपावत्तं वपदस्थात्त्र्यहमेकाहमेधवेति स्मृतेः। एतच्चोपनयनप्रभृतिद्रव्यम्।
वयोवस्था विशेषणहि पूर्वमभिहितम्। तमेवव्यवस्थया वपिकल्पोयं वृत्तस्वाध्यायापेक्षः वृत्तानि च त्रयो पनत दर्थज्ञानानुष्ठानानि।
तेत्रेकगुणमयोगो वाक्यं वचनाद्दशाहमाशौचम्। गुणद्वययोगे त्र्यहम्। गुणत्रययोगे एकाहमिति। अपरे चैकाय शब्दात्त्र्य
शौचमिच्छंति। यदा गुणत्रययोगो भवति। वृत्तिसंकोचश्चत्राहिकएकाहिकोवा भवति तदा सद्यः शौचमिति स्मृत्यंतरम्॥ ॥

॥६९॥
॥जयराम॥

येषांयावदाशौचंतेतावत्स्वाध्यायं वेदनपठेयुर्नचपाठयेयुः।एतेवशौच विकल्पाः प्रातिस्विकाः नतुसूतकाशौचवत्सर्वेषांपदेहे ति।तत्रहिजननेप्प्येवमेवस्यान्माता पित्रोस्तत्सूतकाम्।सूतकंमातुरेवस्यादुपस्पृश्यपिता शुचिरित्यनेनदशाहस्यातिदेशोनवतुरहस्यैकाहानाम्।कुतएतत्। स यनकल्पेनव्यवधानात्। अपिचसर्वकल्पातिदेशोमातुरप्येकाहेनशुद्धिःप्राप्नोति।नच्चेनेष्यते।येन० वैजिकादभिसंबंधात्अपिच।।सर्वल्पानिदेशोदनुरुध्यादध्यत्र्यहमितिपितुस्त्र्यहेण शुद्धिर्मातुश्चैकाहेनेतिविरोधः।कथम्।रजस्तत्राशुचिज्ञयंतच्चपुंसिनविद्यतइति।तस्मादपिदशाहस्यैवातिदेशः।शावंचान। येष्वेवस्यादितिव्याख्यायम्।

नस्वाध्यायम पाठन्नित्यानिनिविवर्त्तेरन्वैतानवर्जम्॥ ॥

एवचसति जननेप्येवस्यादितिसपिंडानांदशाहम्।मातापित्रोश्चसूतकमितितयोश्चदशाहम्।सूतकंमातुरेवस्यादिति।मातुश्चदशाहम्। अत्रपक्षत्रयेपिव्यवस्थायुक्तरूपाभवति।तामाह।सपिंडानांनिर्गुण व दशाहम्।वृत्तवत्वेपिपित्रोश्चदशाहम्।पितुरप्प निवृत्तत्वेमातुरेवदशाहंभवतीति। अस्मिंश्चपक्षेषजिकादनि।संबंधादनुरुध्यादध्यत्र्यहमितिपितुस्त्र्यहनियमइतिव्यवस्थान्याय्याशावेशौवेपिदशाहस्नानांव्यवस्थावन्याय्येति।यत्पुनरुक्तंउपस्पृश्यपिवाशुचिरिति तदमिहोत्रार्थंनव्यनानुव्यवहारार्थं।।तेनसूतकाशौचपक्षत्रयस्याश्रवणात्तत्रनैवव्यवस्थायुक्तेति।शावेपुनर्वृत्ताद्यपेक्षयाप्रातिस्विकेचशुद्धिरिति।।नित्यानिस्मात्तानिकर्माणिनिवर्त्तेरन्। वैतान।। ।।

॥६९॥
॥भाष्य॥

एकेआचार्याःशालाग्नौकर्मनिवृत्तिमिच्छतिएकेनेविकल्पः।यदावानिवृत्तिस्तदान्यएतानिकुर्युरन्स्वपम्प्रेतस्यद्विनिःसंपिडाग्रामंनप्रविशेयुर्नक्षत्रदर्शनादर्वाक्।दिवामरणेरात्रौचेत्प्रेतःस्यातिदादित्यस्यदर्शनादर्वाक्प्रविशेयुः नैरेरसपिंडेरस्केल्यप्रवेशनादि भवति।पक्षंद्वोपक्षोचेति।प्रेतस्पर्शिनामाशौचमितिकेचित्।तत्र।नहिप्रेतस्पर्शनिमात्रेणैचेयंतंकालमाशौचस्यमुक्तत्वम्।तस्माद्यर्जतिरविषयमेवैतत्।।पक्षंवैश्यस्पक्षोपक्षोशूद्रस्य।वाशाद्वाद्वादशाहानिक्षत्रियस्य।शुद्ध्येद्विप्रोदशाहेनद्वादशाहेनभूमिपः।वैश्यःपंचदशाहेनशूद्रोमासेनशुद्ध्यतीति।वचनात्।आचार्येचप्रेतेएवमेवादकदानादिकर्मभवति।मातामहामातामहयोश्च

शाल्लाग्नौवैकेल्पएतानिकुर्युःप्रेतस्पर्शिनोग्रामंनप्रविशेयुरानक्षत्रदर्शनाद्रात्रौवेदादित्यस्पप्रवेशनादिस्मान मितरेःपक्षंद्वोवाशौचमाचार्येचैवंमातामहयोश्चस्त्रीणांवाप्रत्तानांप्रेतानामितरेकुर्वरिंस्ताश्चतेषांप्रोषितश्चेद्यावश्रवणप्रभृतिकृतोदकाःकालशेषमासीरन्नतीतश्चेदेकरात्रंत्रिरात्रंवा॥ ॥

एकारादेवमेच्छाचास्त्राणांवाप्रत्तानामेवमेवेतिकर्तव्यताभवति।प्रत्तानामितरेयेभ्योदत्तास्तेकुर्वरिन्न।अपितेषांकुर्वन्।अथयदिप्रोषितःप्रेयान्म्रियेततदातच्छ्रवणात्कालप्रभृतिकृतोदकाःसंतआशौचकालशेषमाशौचविधानेनासारन्।आशौचकालेतीतश्चेदेकपात्रंत्रिरात्रं।वाशाद्वालाद्यःशौचामपि।अतिक्रांतेदशाहेतुत्रिरात्रमशुचिर्भवेत्।संवत्सरेव्यतीतेतुस्पृष्ट्वैवापोविशुद्ध्यतीतिवचनात्।एकरात्रनुअयनेसमतिक्रांतेत्वेकाहाद्बुद्धिरिष्यतइतिस्मृत्यंतरात्॥ ॥

॥७७॥
॥जयराम॥

रत्निग। दीना। मिच्छंत्योदकदानम्। प्रक्षानांचस्त्रीणामिच्छंत्येव। एकादश्यामेकादशेह निअयुग्मन्त्रिग्न्यां ब्राह्मणा भोजयेदिति
श्राद्धोपलक्षणम्। तच्चश्राद्धंमासं वत्कार्यम्। मामांसन्च प्रेतोदेशेनैके आचार्यागोंधन्तिआलभंतिप्रोतदेशाव वनात्त वैयिम्।
शारवापस्तुरयम्। तमालभ्यतन्मांसेन श्राद्धंकुर्वंति। तच्चोपरिष्टाद्वक्ष्यति नद्यंतरेना। वंकारयेन्न वेति। एतदेवा पिंडकारयेन्न वेति।
एतदेवा पिंडकरणमापतितम्। तत्र चपितृणाप्रथमः प्रेतो भवतितत्प्रभृतिदानम्। सपदिपुत्रवान्न वतितरा। अधिकृतविषयस्
ततः अधिकृते तपुत्रेणपुत्रवत्स्वम्। एतदधिकारस्त्वाग्निमत्त्वेसंतिभवति। तेनाग्निमतः पुत्रस्यपार्वणमेव। तच्चसपिंडाकरणानंतरम्।

अथकामोदानका ं न्खवि   श्वश्रुसंबंधिमातुलभागिनेयानांप्रतानां वैकादश्यामयुग्मान्ब्राह्मणान्भोजयि
त्वा ं स वत्सरेतायो दिश्यगामथैकेध्नंति पिंडकरणेप्रथमः पितृणांप्रेतः स्यात्पुत्रवांश्चेन्निवर्त्तेतचतुर्थः संवत्सरथ
॥गोके॥ ॥

एकोदिष्टं त्वनाधिकृतविषयमिति। सपिंडाकरणेचकृते पितृप्रभृति क्रिम्योदानं चतुर्थस्यानुनिवृत्तिः। त्रिषुपिंडप्रवर्त्तत इतिस्मृतेः
संवत्सरमेके आचार्याः पृथक् एकस्यैव पिंडदानमिच्छंति। कुत एतत्। यतः संवत्सरे सपिंडाकरणात्स्यपते। न चास्त पिंडाकृत
स्पेतरे सहपिंडदानं युंजन्ते इति। अन्वर्थसंज्ञा ह्येषा। यत्सपिंडाकरणमिति। सहपिंडक्रिया सपिंडाकरणम्। तेन संवत्सरं यावदु
नः प्रेतस्य पृथक्पिंडदानमिच्छंत्येके। एवंचसंवत्सरसपिंडाकरणस्मृतिरनुगृहीता भवति॥ ॥

॥७०॥
॥भाष्यं॥

एवंप्राप्तआहन्यायस्त्र। तुआद्यः पक्षव्यावृत्तौ। नैवदेवं संवत्सरं यावत्पृथग्दानमितियेनसंवत्सरस्मृत्यनुग्रहन्यायेनैतत्परिकल्प्य
तेतच्च विरुद्धम्। न चश्रुतिविरोधेन्यायो युक्तः। कोसौ विरोधः। न चतुर्थः पिंडो भवतीतिश्रुतिः। पृथक्क्रियमाणेचतुर्णांपिंडनिर्व
पणाधिकारो भवति। पृथक्प्रेतस्य। अमावास्यायां वाधिकृतस्यपार्वणमिति श्रुतिविरोधः। तेनाधिकृतस्य पुत्रस्यैकोदिष्टं न भवत्येव।
अनधिकृतस्य तु संवत्सरादूर्ध्वमप्येकोदिष्टमिति॥ ॥असमै प्रेताय यथैव ब्राह्मणाय यत्तं प्रत्यहं दद्यात्संवत्सरं यावत्कुंभं चत्वस्य
ता एके आचार्याः। पिंडनिर्वपणमपीच्छंति। एतच्चानधिकृतविषयम्। अधिकृतस्यतुपार्वणमेव भवति नैकपिंड इति। यत्र संव

न्यायस्तु नचतुर्थः पिंडो भवतीतिश्रुतेरहरहरन्नमस्मै ब्राह्मणायो
दकुंभं चदद्यात् पिंडमप्येके निपृणंति॥ ॥१०॥ ॥

त्सरे सपिंडीकरणस्मरणं। तदूर्ध्वं संवत्सराना   वेति परिज्ञापयत्तुम्। प्रागपि भवति। सपिंडीकरणं प्रकृत्य सूत्रकार आह यदह
र्वा वृद्धिरापद्येत इति। वृद्ध्यां स्वान्पुर   कं कार्यम्। तच्चासंपिंडीकृतस्य न भवति। अतः संवत्सरात्प्रागपि भवत्यनधिकृतस्य।
तथा च स्मृत्यंतरम्। अर्वाक्संवत्सराद्यस्य सपिंडीकरणं भवेत्। तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विज इति। एतदे
वचनस्य भवति न पिंडनिर्वपणमिति। त्रिभ्योदनप्रसंगात्॥ ॥

॥७७॥
॥जयराम॥

अधिकृत पुत्रस्यानुद्धा दशाह एवेत्युक्तमेव। यत्त्वेप्रतस्य स्मर्यते मृतेहनि तु कर्तव्यं प्रतिमासं तु वत्सरम्॥ प्रतिसंवत्सरं चैवमाद्य मेकादशेहनीति। तदेतत् सपिंडीकरणात्प्रागेकोद्दिष्टम् ऊर्ध्वं तु पार्वणम्। तथा च मनुः असपिंडक्रियाकर्म द्विजातेः संस्थि तस्य तु। अदैवं भोजयेच्छ्राद्धं पिंडमेकं तु निर्वपेदिति। यावत्सपिंडता न क्रियते तावदेव तत्कर्तव्यमिति। यथा चाह। सह पिंडक्रियायां तु कृतायामस्य धर्मतः॥ अनयैवावृता कार्यं पिंडनिर्वपणं सुतैरिति। सपिंडक्रियोत्तरकालं अनयैव सहपिंडक्रियया पिंडनिर्वपणं सुतैः कार्यम्। केचि सधःस्तनश्लोकोपात्तमनयैवावृतेत्येनेनानुवर्तयति॥ तत्पुनरनुपपन्नार्थम्। उपरितनश्लोकारंभसामर्थ्यात्। अनारब्धे हि तस्मिन्नेकोद्दिष्टलभ्यत एवा द्विजातेः संस्थितस्य तु। अदैवं भोजयेच्छ्राद्धमित्यनेन न अधस्तनश्लोकेव विशेषणार्थवाक्यप्रसंगः सहपिंडक्रियाकर्मेति। द्विजातिः संस्थितस्यत्येवमादिनेव पादत्रयेणार्थस्य सिद्धत्वात्। यत्पुनरुच्यते सततऊर्ध्वं वर्षे वर्षे प्रेताया न्नदद्यात् यस्मिन्नाहि निप्रेतः स्यादिति तदेकवविशिष्टस्यासंनिधानादेकत्वविशिष्टस्याभावति। तत्र न त्वत्रैकत्वमुपादीयमानं विशेषणम्। यन्न प्रतोदेशेन दानविधानमेव विवक्ष्यते। तस्माद् विवक्षेकत्वस्या यथास्मत्संततेरभिहितं तथैव देयमिति॥१०॥

॥७६॥
॥श्रा०प्र०॥

प्रेता यो द्विरूपगामप्येके घ्नतीति शाखापशु अभिधानम् तत्प्रसंगेन यावंतोर्द्ध पुत्रावस्तत्कर्मव्याख्यास्यते। सयेदमभिधीयतेस्मार्त्तः पशुश्च। क्रियते तथागांगोपशु वर्जमाल्ला व्यस्थापयित्वा नियुज्यते। कुत्रेत्यपेक्षायामाह। परीत्यप्रादक्षिण्येन गत्वा अग्नेर्यामग्नीन् अग्निपूर्वभागे निहितिति निरवनंति। सा च यूपार्थे। अतश्चाज्यासादनोत्तरकालं निरवननम्। परिव्ययणं त्रिगुणरशनया वेष्टनम्। उपाकरणात्पणेन पशोः नियोजनं द्विगुणरशनानुयाश्रृंगयो वध्यस्य पशोः शाखायां बधनम्। आवृतापशुप्रकारणोक्तेतिकर्तव्यतया विनामंत्रम्। आवजहत्। ये यत्पशुसंस्कारकं पशुसंमंजनायर्याग्निकरणादितदप्यावृत

पशुश्चेद्दाल्लाव्यागामग्नेणाग्नीन्परीत्य पलाशशाखां निर्हीतिपरिव्ययणोपाकरणनियोजनप्रोक्षणा न्यावृता कुर्याद्यचान्यत्परिपशव्यं कृत्वा तूष्णीमुपराः पंच वपाधरणं वाभिधार्य दैवतावादिदुपाकरण नियोजनप्रोक्षणेषु स्थालीपाकेवेवपां कृत्वा वदा। नीन्यवद्यतिसर्वाणि त्रीणि पंच वा स्थालीपाकमिण्यवदानानि जुहोति पश्वंगं दक्षिणा तद्देवतं तद्देवतं यजेत॥ ॥

कार्यम्। परिपशव्ये संज्ञपनमस्याघतयोरादुत्ताद्देस्वाहा देवेभ्यः देवेभ्यः स्वाहेति कृत्वा पराः पंच जुहोतीति शेषः। उ त्सव पाभिधारणम् स्थालीपाकेप्यवदेवतादेशः। वपां कृत्वा वदानग्रहणे व्यैमेउ व्यमाणे पशुपुरोडाशो निरस्तो भवति। अन्त्राहवपां कृत्वेति सर्वपक्षे तत एव स्विष्टकृत् अस्ताभ्यां गश्चदेयः स्थालीपाकमिश्राणीति ग्रहणात्तस्याज्येन सहश्रपयणाम् पुर्धश्च अगदक्षिणेत्यत्र पूर्णपात्रो वरो वेति वर्तत्तो यद्देवत्यस्त्वेति विशेषस्तद्देवत्यः पशुरालभ्यते दर्शपशुषु। तस्याध्यस्यदेवते व देवता यस्य यागस्य स तद्देवत्यः तस्मिन् यागे तद्देवतं तामिवद्देवतां यजेदित्यर्थः॥ ॥ ॥

तस्मै ग्विशेषाय। नयंतर इतिदुक्तेऽतयोर्दिश्यगामप्येके धूनाति तस्यैतत्व्यदेशो विधानम्॥ न द द्धिर्धिनावमुच्यते। नयतरे
ना वृंकारयेदित्यनेन वश्राद्धार्थः पशुरुपक्रातः। न वश्राद्धशब्देनप्रयमेकोद्दशाहिकश्राद्धमुच्यते॥ ११॥ एतत्प्रसंगेनपश्च
तरनैमित्तिकमभिधानुमाह अथैत्यादि। वक्ष्यतर इतिसूत्रशेषः। अकार्णीब्रह्मचारीसन्न्यस्त्रियमुपेतिसोऽनेनाधिक्रियते।
पाकयज्ञेनयजेतेत्यनेनान्योपि हविर्यज्ञरूपो वकीर्णिः पशुरस्तात्सुक्तम्। अग्निविस्यमगन्यपवादोवदानमात्रस्य। अधारा
दिकं नावेच। भूमौपश्चितिशास्त्वापशो पुरोडाशाभावाद्विधानम्। तस्यवाज्येनसहसंस्कारानुष्ठानम्। तामेवगर्दभस्यस्त्वि

तस्मै वभागंकुर्यात्ति व यादिममनुज्ञापयेतिनयंतरेना वंकारयेन्न वा॥ ११॥ अथातोवकाणिप्रायश्चित्तममाः
वास्यायांचतुष्पथेगर्दभंपशुमालभते निर्ऋतिंपाकयज्ञेनयजताश्चवदानहोमो भूमौपशुपुरोडाशेश्रपणं
तांस्त्वचिंपरिदधाते। ईद्धवालमित्येकेसंवत्सरंभिक्षाचर्यंचरेत्स्वकर्मपरिकीर्त्तयन्नथापरमाज्याहुतीजुहो
तिकामावकर्णोस्म्येकामकामायस्वाहा॥ ॥

त्वंचपरिदधाता। ऊर्द्ध्ववाला वेतिविकल्पः। वालशब्देनपुच्छमभिधीयते। स्वकर्मत्र वकीर्णित्वम्। निरुक्तं वा एनः कनीयो भवती
ति श्रुतेः॥ ॥ अथापरंप्रायश्चित्तांतरं। वक्ष्यत इतिसूत्रशेषः। आज्याहुतीर्जुहोतिकामावकीर्णोस्मि। कामाभिद्रुग्धोस्म्यात्येता
भ्यां मंत्राभ्याम्। एते आहुती आगंतुत्वाच्चतुर्दशाहुत्यंते भवतः। अथ मंत्रार्थः। तत्रद्वयोः प्रजापतिरनुष्टुप्कामश्चाज्याहोमे हिक्का
मेनलक्तताशोनेनेत्र वकीर्णः अभिभूतोवकीर्णः क्षतव्रतोस्मि। अतः कामायशोधकेत्वेनहविः कामपमानायतुभ्यंस्वाहा।
रिदुत्तमस्त॥

एवमभिदुग्धोहिंसितः शिष्टसमानम्॥ अथोपस्थानमंत्रार्थः। तत्रप्रजापतिरनुष्टुप् लिंगोक्ता। उपस्थाने। मरुतो मामासम्पर
सिंचंतु अभिष्टप्रदानेनसमर्द्धयंतु। प्रजयाचपुत्रादिरूपया। तथाधनेनधर्मानुकूलसम चा। चकारात्सिंचंतु। तथेंद्रः स
म्पकर्त्सिंचं त्वित्युत्तरत्रापियोज्यम्॥ ॥ एतदेवप्रायश्चित्तं। प्रायोजनानामंतपः प्रोक्तं चितं निश्चयमुच्यते तपो निश्चयमुच्यते
प्रायश्चित्तमितीरितम्॥ १३॥ सनाप्रवेशनं वक्ष्यत इतिसूत्रशेषः। तत्रसंभारप्रतिश्च न्य तिश्रभिमुखवगृह्णतिसंभांगिरसीसने
नेनमंत्रेणात्रास्यार्थः। तत्रांगिरागायत्रासभारन वेशाने। सहधर्मेणसभिवभाती तिसमीत नादिर्नदशावानामनात्रासि।

कामाभिदुग्धोस्म्यभिदुग्धोस्मिकामयस्वाहेत्यथोपतिष्ठतेसम्मासिंचंतुमारुतः सभांप्रवेशमपूमिंद्रः सबृह
स्पतिः। सम्मा पमग्निः सिंचतुप्रजायाचधनेनचेत्यतदेवप्रायश्चित्तम्॥ १२॥ ॥ अथतेः सभाप्रवेशनंपूस
भामभ्यनिसं भागिरसिन। दिर्नामासि त्विषिर्नामासितस्यैतेनसमइत्यथप्रवशातिसंत्रार्थभावमासमिति
श्री भेप्रजापतेर्दुहितरोस वेनसो। योमानविद्यादुपमासतिष्ठेत्सचतनोभवतुशःसथेजइति॥ ॥

हेअंगिरसिअंगिरादेवते। बृहस्पत्यधिष्ठिते वा। त्विषिदीप्ता नामप्रसिद्धंअसि। धर्मनिरूपणात्। तस्यैउक्तगणवत्यैनेनुभ्यंनमोस्तु
॥ ॥ अथप्रवेशनमंत्रार्थः। तत्रप्रजापतिस्त्रिष्टुप्सभासमितिश्चप्रवेशनेस चि। संत्। समितिश्चसंगरः। तेउभेप्रजापतेर्ब्र
ह्मणोदुहितरौ पुत्र्योमामां अवतामितिशेषः यतएतेसचेतसोशोभनदा। श्यौ। अथस्भाया व वनंसभावंदःप्रति पुमान्
मामांनविद्यात्मद्घ्यवहारंनजानीयात्सपुमान्मामांउपतिष्ठेतव उपासात्। ततोलोके यथेसंभाषणायसचेतनः सुबुद्धिः॥ ॥

॥७३॥
॥नयराम॥

पर्षदं स भामेत्य गत्य जपेदभिभूरहमिति मंत्रात्। तस्यार्थः। तत्र प्रजापतिरनुष्टुप् पर्षत् सभोपस्थानं। अभिभूः परेषामभिभवनक र्त्ताहं आगतोस्मि। किंभूतः अवि हे। विरुद्धतपा राजन्ते स विराट् रुद्ध वार्यः। न विराट् अविराट्। तस्य प्रति वाशी। प्रतिवादिशून्यः। आ उत्य व्ययं सबुद्ध्यर्थम्। यद्वा अप्रति वाद्यार इति पर्षदो विशेषणम्। अप्रतिक्षेपा पा अस्याः पर्षदः सभायाः इशानः स्वामी स्वासु दुष्टोपि समं पिसुजनः। अस्ति निशेषः। दुष्टस्य योगः॥ ॥ सत्साधके यदि सन्नेरां कुद्ध जानायाक्षदाक्षमभिमंत्रयते क्रोधापनोदाय या तए षेत्तिमूस्त दृपन। अस्यार्थः तत्र प्रजापति लिंगोक्ताः क्रोधापनयने। हे असौ असुकनामन् सन्नेशातत वदाटलं लाटं तत्र भवा साद्याया क्रोध

पर्षदमेत्य जपेदभिभूरहमागमविराट् प्रति वाश्य अस्याः पर्षद इशानासइ वासु दुष्टो जन इतियं परिमन्येत क्रुद्धो यमिति तमभिमंत्रयते या न एषा रराद्यातत्तमन्यो क्रोधस्य नाशनी। तादेवा ब्रह्मचारिणो विनयं नु सुमेधसः श्वौ रदं थिवी वाहतो क्रोधनयामसि। गर्भमश्वतयं सहासाविति॥

स्य ततः शारादनां देवानां द्वायाः ब्रह्मचारिणस्थ सनकाद्यापि नियं नु अयं न अपनयनु किं भूतस्य क्रोधम्य मन्योः दीप्तस्य। किं न्तादेवाः। सुमेधसः स्वबुद्ध्या क्रोधमपाकर्तुं शक्ताः। किं भूतातनूः। नानानाचतुर्वर्गस्येत्यया तत्। एषा लल्लाट त्रिल लिनूपा। मंत्र न्यासेना सनो सुत्कर्षमाह। घोराकारा नूपोहमितिक्रोधा वर लमुक्तमभ्यर्थि क्षितिरूपश्चाहमिक्रोधायारन्वेनस्वा स्वातंत्र्यवो क्तम्। अ तस्तोतः स्वनूपो नूत्वा त्वा तेश व क्रोधनयामस्मित्र वल्लेनापनयामि। कथम्। यथात्र अश्वतराग र्भ सुष्टि नसहमाना अनागेण मुंचति तितथेति व्याख्येयम्॥ ॥ ॥

॥७३॥
॥भाष्यं॥

अथसत्पकोयदि मन्यनायां समेत्यो दुग्धो द्रोहकादीति तदा तमभिमंत्रयते तांत इति मंत्रेण। अस्यार्थः। तत्र प्रजापतिरनुष्टुप् इशो वशीक रणे। हे सभेशा भवान् ममशे हकारिणी वा च आस्येसुखे वर्त्तमानां आदत्ते प्रजापतिरनुष्टुप् इशो वशीकरणोपक्रामतितांमहं तेन बृहदय रवाद्वधे स्थापयामि॥ किंच। यत्र यत्र स्थाने वारु चासु वशा त्रिहिताना तं तं तत्र स्थानात्। आददे मद्वाश्यां करोमि। किंच। यदहं ब्रवीमि तत्सत्यमस्तु त्वं च मत्स मक्षः। अधरो नीचैः। अद्य इदानीं स्वभव अघेत्यत्र वर्णलोपः। अधरं इति छंदः। तत्र उ द्रिदिदा दार्थि अतिशायन स्वभूयाः। यद्वा। तासहो हि कारिणी वा वत नहदयपव अतिशायेन घस्व अ करं वडपाशिष्टं समाम्॥ ३ ॥ अथातो रथारोहणं। वक्ष्यत इति

अथपदिमत्येतद्दुग्धो व मितितमभिमंत्रयते तातेवा वमास्य आदत्ते हृदयस्य आदधे॥ यत्र यत्र अथातो वाक्तांतत्त स्तातत्रादे। यदहं ब्रवीमि तत्सत्यम् धरोमत्तां घस्वेन्येतदेन वशाकरणम्॥ १३ ॥ अथातो रथारोहणं युक्तो रतिर थं सं प्रेष्य युक्त इति प्रोक्ते सा विराडित्यस्ये चक्रे अभिमृशति रथंतरमसीति दक्षिणं बृहदसीत्युत्तरं वामदेव्यमसी ति कच्चर्यं हस्तेनोपस्थमभिमृशति॥ ॥

सूत्रार्थः। ततः स्वामा रथं युक्तेति प्रैषेपासारथिं प्रेषयित्वा प्रेषितेन तेनैव युक्त इति निवेदिते। सा विराडित्येता वता मंत्रेण रथमेस गस्य चक्रे रथ्या गे हस्तेनाभिमृशति। तत्र रथंतरमसीत्यनाचरतामंत्रेण दक्षिणं चक्रं। बृहदसीत्येता वता वामम्। अथमंत्रार्थः। तत्र याणां परमेष्ठी यजूं यजूं षि अंगानि। अभिमर्शनीयोयं रथः सा विराट् अत्र दात्रा देवता॥ ८ यंतारादानि सामानि कूषरी युगंधरम्। उपस्थ छर्ना उमा। हस्तेनेति सर्वत्र संबध्यते॥ ॥

।।७४।।
।।जयराम।।

तत्र मंत्रः अंकौन्यंका वितितास्यार्थः तत्रप्रजापतिस्त्रिष्टुप् अग्नंत द त्रिमरनि। अंकौद्वे। अकारव्यगणपा वा। ग्नि। वेरो। षे। एवंन्यकामभि एवंभूतो पावग्नी अभितो रथ्यं रथस्यसर्वतो रक्षकत्वेन तं दुर्गमं प्राप्य वातस्याग्नेः सुरवं अनु अनुस्यूतस चरंतो सम्य ग्मच्छतो वर्ग तो। य वापरे दूरे हे तिः वृहज्ज्वालः। तथा इंद्रिय वान् इंद्रिया नुइंद्रिया नुग्रहकः। इंद्रियश्वात्रेंद्र रथः तथापत पक्षिकुलानुग्रहकम गि भेदम्। ते एतेग्नयः नोस्मान् पारयंतु नि वि घ्नता भाध्रियतो प्रापयंतु। किंभूताः अपयः आस्मान्मनोरथं पूरणं शीलाः।। ।।तगोर क्षिणधुर्यधुरि युक्तं चाहं प्रजापति त्रक र्षेणाजयति गमनाय प्रेरयति। अजगता वितिधातुः। नमोमाणि चरायेति मंत्रेण। तस्यार्थः स

अंकैन्यकावाभितो रथ्यं यो तं चाताग्नमनु संचरंतम्।। दूरेहेतिरिंद्रिय वान्यत त्रितेनोग्नयः अप्रयः पारयं त्विति
नमोमाणि वरायेति दक्षिण धुर्य्य प्राजत्यप्राप्यदेवताः प्रत्ये वोहत्तं प्रतिब्राह्मणान्मध्येग: अभिक्रम्य पित्रत्र
स्त्री ब्रह्मचारिणो सारथी स्यातां सुदूर्त्तमिनीयायजयेदिहरति रिहरति मह्ममे केमास्विहरे ति रिति।। ।।

स तत्र प्रजापतिरुष्मिकमाणिचरः प्रेरणेः मणिचरो रयाधिष्ठात्रादेवतातूष्णीवामप्राजनम्। देवताः अप्राप्य तादर्शनात्प्राकूपाव च्छक्तिप्रस्त्वरोतस्था। द वतरेत पदाति भूर्गच्छेदित्यर्थः। संप्रतिक्रम्य ब्राह्मणान्प्रत्यश्वरो त्रित्यनुषंगः सर्व त्रगाः प्राप्यतन्मध्य मत्वा पितृन् अभ्यागच्छन्तः पित्रादिमान्यान्। अभिक्रम्य भक्तत्वेन। भिपत्य। उ नीर्यत्वितुद्र अतीयायत्र अनिषाद्यजयेदि रतित्यमुमंत्रम्। तस्यार्थः। तत्रप्रजापतिर्यजुरग्निः रमणे। हे अग्नयः यूयं एके मुरव्या इहरथे रम क्रौडध्वं क्रौडध्वं उ म यतो मम इहरथेर तिरस्तिः। अतो। भा मां त्राप्य नवनाम पि इहमे इयेसुत्रोभिनो रातिरस्तु।। ।।

।।७४।।
।।भाष्य।।

स साध के यदि दुर्बलो रथो यस्य स रथ्या स्यात राा तं रथमास्थाय जपेदयं वामित्ति मंत्रम्। तस्यार्थः तत्रद्वयोः प्रजा पतिर नुष्टुप् अतुं अश्विनौ जपे। हे अश्विना अश्विनौ। अयं वां युवयोस्य: दुर्गे विषमस्थानोस्त रः दिसकाद्धेतो मां मां मा रिषत् मा हिंसिष्ट। सू रिपोदिसार्थे।। एतेनोत्तरोपि व्याख्यायतः।। ।। स रथो यद्येवमभि मंत्रितो पि भ्रम्यात् कुटि लं गच्छेत् तेदा तद्द्वजस्त म्नं भूमिं वोपस्पृश्य जप देष वामित्यमुमंत्रम्। आर्त्तिः पिंडा। रिष्टि विध्रमउ निस्वयो ए बद्धा सोदके दानेरपोप वः अपराधमर्ज्जनम्।। ७।। अथातो हस्त्यारोहणम्। वक्ष्यतइतिशावः। हस्ति न मेत्यत स्पृशतीह।

सयदि दुर्बलरथः स्यात्त मास्थाय जपेदयं वामश्विना रथो मा दुर्गे मा स्तरारिषदिति स यदि भ्रम्या त्स्त ममुपस्पृ श्य भूमिं वा जपेदेय वामश्विना रथो मा दुर्गे मा स्तरो रिषदिति तस्यन काव नार्त्तिन्न रिष्टि र्भवतिया त्वा हूां नेविमुच्य रथ्य य वसोदके दापयेदेष उ वाहनस्याप क्र वरतिश्रु तेः।।१४।। अथातो हपामेत्य हस्ति नमभि स्पृशति हस्तियशय मसि हस्तिवर्च्चसमसीत्यथारो हतीं इस्यत्वा वज्रेणाभितिष्ठामि त्वा स्ति मा संपादयेयेतेनैवाश्वारोहणं व्याख्यातम्।।।।

स्तियशासमसी स नेन मंत्रेणा। तस्यार्थः। तत्र द्वयोर्ब्रह्मा यजुषा हस्ती शो देव तेस्पर्शना रोहणयोः हस्तिनां ए रा वत त्वेनश्रे सिद्धं यशा एव हस्तियशास्त्वं तद्रूपोसि।। रथां तंषांव र्चेशिभि रे व हस्ती वर्च्चसं तद्रूपश्चासनि।। अथ तमारोहति इंद्रस्य वेति मंत्रेणा। तस्यार्थः इंद्रस्य व णायुधेनसहमिंद्रो तेसौ त्वा त्वा मा धितिष्ठामि स्य वैशत्रु जयार्थमारोहामि। त्वं वमा मास्वस्ति कल्याणं यथा तथा पारयेत्युक्ता थेम्।। एवमेवाश्वारोहणं कर्त्तव्यम्। तत्रमत्रोहः नु हस्तिस्थाने अश्वस्थानिधानम्।। ।।

हस्ता

॥७५॥
॥जयराम॥

उद्भ्रमारोक्ष्यन्नारोढुमिच्छन्तं स्पृष्ट्वाभिमंत्रयते त्वाष्ट्रोसीति मंत्रेण एतदाद्यार्थः सुगमः। तत्र परमेष्ठी यजुस्स इस्तदारोह
णे। रा. सिनवत्राश्वतरं मंत्रलिंगात् तदर्थः। तत्र विश्वामित्रः पंक्तिः रासभस्तदारोहणे। हे रासभ त्वं शूद्रः हाने: असि। य
तः शूद्रः शोकावहं जन्म यस्य सः। आग्नेयः अग्निर्देवताः। आध्या इंद्रन्यामुद्भूतत्वोद्धिरेताः॥ ॥चतुष्पथं गच्छेस्तदभि
मंत्रतेन नमो रुद्रायेति मंत्रेणा तत्र परमेष्ठी अनुष्टुप् रुद्रो रक्षणे पथिषु। सीदंति छतीति पथिसत् तस्मै। एवमुत्तरत्रा
पि। सुनावमिति मंत्रेण नावमारुह्य वर्त्तितुमिच्छन् सुत्रामाण

सू१

उद्भ्रमारोक्ष्यन्नभिमंत्रयते त्वाष्ट्रोसि त्वद्देवत्यः स्वस्ति मा रोपेति रासभमारो   हन्नभिमंत्रयते शूद्रोसि शूद्र जन्माग्नेयो
वै नेयो। वैद्धिरेताः स्वस्ति मा संपारयेति चतुःपथमभिमंत्रयेत नमो रुद्राय पथिषदे स्वस्ति मा संपारयेति नदीपार
ति नदीश्च त्तरिष्यन्नभिमंत्रयते नमो रुद्राय प्सु   षदे स्वस्ति मा संपारयेति नावरोक्ष्यन्नभिमंत्रयते सुनावमित्युत्त
रिष्यन्नभिमंत्रयते सुत्रामाणमिति वनमभिमंत्रयते नमो रुद्राय वनसदे स्वस्ति मा संपारयेति गिरिम
भिमंत्रयते नमो रुद्राय गिरिषदे स्वस्ति मा संपारयेति श्मशानमभिमंत्रयते नमो रुद्राय पितृषदे स्वस्ति मा सं
पारयेति गोष्ठमभिमंत्रयते नमो रुद्राय शकृत्पिण्डसदे स्वस्ति मा संपारयेति यत्र वा चान्यत्रापि नमो रुद्रायेत्येव
ब्रूयाद्रुद्रो ह्येवेदं सर्वमिति श्रुतेः॥ ॥

मितिमंत्रेणावत्तरेत्। पितृसदे पितृवने वाग्निनो पत्रेत्यनुत्त्य संगेस्वपि नमो रुद्रायेत्येव ब्रूयात्। कुतः। हि यत इदं सर्वं
रुद्र एवेति श्रुतिः। एवं कृते निर्विघ्नताविघ्नानुष्ठानफलं वस्मात्॥ ॥

॥७५॥
॥भाष्य॥

सिच्छद्देनव   प्रांतेकदेशोदशेति प्रसिद्धः। तद्युक्तो वायुरमंगलः। तथा चापस्तंबसूत्रम्। यदा वापहतं सिवा वामुना. वा
अन्नेनन्य उपस्पादिति। तपास्ति वा वधूतो वाजितस्तदा तामभिमंत्रयते   गसाति मंत्रेण तत्र त्रयाणां प्रजापतिरनुष्टुप्लि
गोक्ता अभिमंत्रणे। स्तान पितृमयग्गाजितं   त्वाभिमंत्रयते शिनइति मंत्रेण अस्यार्थः। हे इंद्रा शिवाः कल्याणकारिण्यो
नोस्माकं वर्षावृष्टयः संतु। तथा हे नयाः ऐंद्रा एवा युधानि शिवा नोस्माकं संतु। हे वृत्रहन् यास्त्वं हेशी   शतुषु सृजसि शि
पसिता अपि नः शिवाः संतु॥ शिवां सृगालां वाश्यमानां शकुनिं वाणी आभिमंत्रणे पशोशिवो नामेति मंत्रेणाययप्य

सिवां वधूतो भिमंत्रयते सिगासिनव   सिनमस्ते अस्तु मा मा हिंसीरिति स्तनापि   मभिमंत्रयते शिवा नो वा
र्षाः संतु शिवा नः संतु हेतयः। शिवा नस्ताः संतु पास्त्वं सृजसि वृत्रहन्निति शिवां वाश्यमानां नामभिमंत्रयते शि
वो नामेति शकुनिं वाश्यमानमभिमंत्रयते हिरण्यपर्णशकुने देवानां प्रहितंगमः। यमदूत नमस्ते   किं त्वा का
ककिरिणो ब्रवीदिति॥ ॥

मंत्रः कुशादाने विनियुक्तस्तथापि नानाशक्तित्वादत्रापि विनियुज्यते॥ शकुनिं स्व   काकं अथ मंत्रार्थः। आगुर्जेमभ्यादि
हिरण्यपर्णशीघ्रगा। हे शकुने देवानां प्रहितं प्रेषितं स्थानं गच्छतीति। देवादिषु शुभाशुभं गमयतीति वा॥ जो यमस्य दूत। ते तु
भ्यं नमोस्तु। त्वां काककिरिण इति द्वितीयार्थे षष्ठी। काकरिं काकाजातस्तु रूपं शब्दं कुर्वं प्रति पनः काम जवीत। का
किरिणस्त्वं वस्त्वा मा[illegible]य मस्त्वा किम जवीत मा ग्रवीत्वित्यर्थः॥ ॥

लक्ष्यण्यं प्रसिद्धं। यत्र तिसिद्धमाम स्यापि प्रसिद्धिर्भवति त द्वृक्षं दृष्ट्वाभिमंत्रयते मात्वेति मंत्रेण। अस्यार्थः। तत्र प्र
जोपवानस्पति स्तद्रक्षपो दक्षत्वात्वां अशनिर्यज्ञो माहिंसीत्। मा नाशयतु। एवमुत्तरत्रापि योज्यम्। परशुः कुठारः राज
प्रेषितो दंडो राजोपद्रवः। आग्नि ततश्च स्वस्तिकल्याणं मूलं मा हिंसीत्। ततवां कुरः श्वप्रगो हंनापन्न वाकुमच्छं तु। निवाने
अल्पवात्वा व्योप्राप्य दैवं निवर्षतु। ततश्च स्वजिकल्याणम हे वनस्पते। तथा हे वनस्पते। मे ममापि स्वस्त्यस्तु॥ ॥
सस्नातयदि किंचिद्दूवाटिकं लभेत तत्प्रतिगृह्णीतीति द्यौस्त्वेति मंत्रेण। प्रतिग्रहः स्वीकारः अस्यार्थः। तत्र प्रजापतिरू
के दक्षिणाग्नीकरणे। हे दक्षिणे द्यौराकाशभिमाननी तात्वां त्वां ददातु। यजमानो देवरूपो भूत्वा ददात्वित्यर्थः। ए पि

लक्ष्यण्यमभिमंत्रयते मात्वाशनिर्मा परशुर्मवातो माराजप्रेषितो दंडः। अकुश स्तेप्ररोहं तु निवाते त्वाभि
वर्षतु। अग्निष्टे मूलं मा हिंसीत्स्वस्ति तेस्तु वनस्पते स्वस्तिमेस्तु वनस्पत इति सपदि किंचिल्लभेतत प्रति
गृह्णीति द्यौस्त्वा ददातु पृथिवीत्वा प्रतिगृह्णात्विति स्मास्य नदहातः क्षीयते भूयसा वप्रतिगृह्णीताभवति॥ ॥

वीसर्वसहात्वा त्वां प्रतिगृह्णातु पृथिवीरूपो मानुषो भूत्वा प्रगृह्णात्वित्यर्थः। त्वेत्वदावत्तिर्दक्षिणायाः कर्मसद्गुण्यकृतत्वारव्यपना
र्था। एवं संस्कृता दक्षिणादातृप्रतिगृहिणोः सिद्धिकरी भवति। तत्र दातुः सिद्धिरपूर्वोत्पादकत्वेन। प्रतिग्राहिणो विर्मानुष्ठानयोग्य
त्वात्। प्रतिग्रहधनाविप्राइत्यादिवचनात्॥ ॥सा एवं संस्कृता सती अस्य ददतो न ते वर्द्धत इत्यर्थः। एवं प्रतिगृहीता सती प्र
तिगृहीतुर्भूयसा प्रवुरतरा भवति। अयं चेसर्वप्रतिहो मंत्रस्नातकस्य॥ ॥

ऊर्दनं भक्ष्यम्। तस्य लब्धस्य अवेय वल्लक्षणां षष्ठीयम्। द्विःद्विवारं प्राश्नाति ब्राह्मात्वेति मंत्रभेदात्। प्राश्नावृत्तेन मंत्र
भेदः॥ द दुग्धजलो नामन्यतम मिश्राः सक्तवो मंथशब्देनाभिधीयते। नलभेतत दा द्यौ वेति। मंत्रेण प्रतिगृ
ह्यते स्य त्रिः। त्रिः प्राशानं ब्रह्मा वेति प्रतिमंत्रम्। अस्यार्थः सुगमः। एवं प्रतिग्रहेण दोषाभावो पि भवति दोषश्च प्रति
ग्रहे पाविप्राणां ब्राह्मतेजो विनश्यतीति। यो न धर्मं विधिवदेत्यादि वचनाद्योदात्ता प्रतिग्राही वा न विधिसः सस्ते
के नेविचक्षणामितिमंत्रेणां गाले भनेम्। तस्यार्थः। तत्र परमेष्ठी अगानि तदालभने। प्रता कमुरवं मेममविचक्षण

अपयोदनं लभेतत प्रतिगृह्य द्यौस्त्वेति तस्य द्विः प्राश्नाति ब्रह्मात्वा प्राश्नात्विति सयदि मंथं लभेत तत प्रति
गृह्य द्यौस्त्वेति तस्य त्रिः प्राश्नाति ब्रह्मात्वा श्नातु ब्रह्मात्वा प्राश्नातु ब्रह्मात्वा पिवत्वित्यथातो धीतो धीसानि
राकरणं प्रतीकं मे विचक्षणं जिह्वा मे मधुवद्वचः कर्णाभ्यां भूरि श्रवं श्रुवेमात्वं ऊहार्षाः श्रुतमपि। ब्रह्मणः प्रव
चनमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्मकोशोसि॥ ॥

विशिष्टवर्णोच्चारणसमर्थम्। अस्त्विति शेषः। मधुवमधुरं यद्वचस्तद्वदत्विति शेषः। भूरि बहुकालं वा श्रुश्रुवे शृणवानि।
लोब्रह्मणोन् वेद पुरुषामपि विषये यच्छ्रुतं शास्त्रेत नवत्वेमाहार्षाः। महार तदर्थं स्तोति। ब्रह्मणो वेदस्य प्रवचनं अ
अध्ययनत्वमसि। ब्रह्मणः आद्यातस्य वेदस्य प्रतिष्ठानं स्थितिराधारइतियावत्। ब्रह्मणस्तस्य कोशो गोपनगृहम्॥

॥७७॥
॥रामराम॥

सनिः संभजनायमूः। शांतिरनिवृत्तिः। अनिराकरणं अप्रमादः अविस्मरणमितियावत्॥ ॥ ... ममाम ...
कोशं वेदायं विशश्रुतिविरा। सर्वेषां वेदानां हृदयमेकायनमिति श्रुतेः। अर्ह वा वा सत्ये वाण्या त्वा त्वा पिदधा
मि गोपाय छादयामिति वा॥ यथाम नापैषि। अवृत्तिर्यथियिस्थिरानुदात्ताद्यः। करणनिस्संवृतादीनि। कण्ठः के
ठे भवा अकुहविसर्जनीयाः। अरसाः सहकारावर्गपवमानं संस्थांः। दंत्या तनुलसाः। नु उपूपध्मानीयाः। तेषां
गहणमुपादानम्। धारणं स्थिरीकरणम्। उच्चारणं प्रयोगः। तेषु शक्तिर्मय्यस्तु। अंगानि गात्राणि अप्यायंतु तान्या

सनिरासि शांतिरस्यानिराकरणमसि ब्रह्मकोशं मे विशवा वा त्वा पिदधामि वा वा त्वा पिदधामि स्वरस्कार
कंठ्यो रसस्त्यो ग्रहणधारणोच्चारणशक्तिर्मयि भक्षि वत्वाप्यायंतु मेगानि वाक्प्राणश्चक्षुःश्रोत्रंय
शो बलम्। यन्मे श्रुतमधीतं तन्मे मयं नस्तितिष्ठतु तिष्ठतु॥ ५॥ ॥ ॥

हा वा गीः। प्राणो वायुः प्रधानभूतः। चक्षुर्नेत्रबलम्। श्रोत्रम्। श्रोत्रमूं तत्पाटवम्। यशः कीर्तिः॥ बलं शारीरं। एत
त्यगात्याप्यपंक्तितिसंबंधः। परस्मैपदं छांदसम्। यत्से मया श्रुतमामांसादि। अधीतं अंगादि। यद्वा श्रुतां गुरुमुखात्
अधितं अभ्यस्तं अधिगतं वा तत्सर्वं मे मम मनसि हृदये तिष्ठतु स्थिरमस्तु॥ मा पयो वियुयं॥ विंशांग्रंथसमा व्योतनार्थः
॥१५॥ ॥क्षंतव्यं विद्वद्भिर्यन्मया वापलं कृतं। गह्यमाप्यमले खादं दृष्ट्वा कंकादिकौशलम्। शोधनायमिदं सद्भिर्म
त्वा पलवापलम्। वोल्प प्रोत्साहितस्यात्र यस्त्रे सवलितं मम॥२॥ ॥ ॥

॥७७॥
॥भाष्यं॥

॥७८॥

श्रीमन्मंत्रिकमाधवश्रुतिसुधासिंधोर्विगा तद्दे स्तत्त्रपयानवद्विजवरः श्रीकेशवस्तद्दिशः॥ तस्यां
द्विद्यकस्य शात्कृतमिदं कातीयसूत्रस्य सद्भाष्यं सज्जनवल्लभं सुविदुषां प्रेष्ठं शिवशातये॥३॥ अ
वाश्रायरन्नामधेयइति यो दामोदरो भूद्विजो भारद्वाजसुगोत्रा अत्मरतिरप्यस्यात्मजस्ता दशः
नाम्ना श्रीवलः॥ ॥इति श्री मत्पारस्करकृते गृह्यसूत्रे तृतीयं कांडं समाप्तमिदं गृह्यसूत्रम्
भद्र आप्तसूयशास्तत्तत्सुनै तत्कृतं भाष्यं सज्जनवल्लभं जयपुण्या रामेण मत्यै शुभम्॥४॥
केकादिद्विजवर्याणां दृष्ट्वा भाष्याणि भूरिशः। उपवेनु तं दुलिष्टं जपरा मोत्लिखत्स्फुटम्॥५॥
शिशीदुरसवेरद्दे मासी षे प्रथमे दले। त्रयोदश्या मिंदुयुजि प्राले खीदं सतां प्रियम्॥६॥
इति श्री मत्कातीयगृह्यसूत्रभाष्ये सज्जनवल्लभाख्ये जयरामकृतौ तृतीयकांडविवरण
समाप्तं॥ ॥लिखितं मदनकायस्य भट्टनागरकासिवासि॥ ॥

॥७४॥
॥श्रीराम॥

॥७८.
॥भागे॰

[OrderDescription]
,CREATED=20.07.19 17:09
,TRANSFERRED=2019/07/20 at 17:29:45
,PAGES=79
,TYPE=STD
,NAME=S0001056
,Book Name=M-1960-PARSKARGRAHYSUTT TRITIYA KAND JAYRAMBHASHYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF

FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF

FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,